पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽंशके।
ककुद्यंशे च हृत्पूर्व्वं पाणिपादयुगे तथा॥
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात्॥"
तद्यथा। अं नमो ललाटे। आं नमो मुखे। इं ईं चक्षुषोः। उं ऊं कर्णयोः। ऋं ॠं नसोः। ऌं ॡं गण्डयोः। एं ओष्ठे। ऐं अधरे। ओं ऊर्द्धदन्ते। औं अधोदन्ते। अं ब्रह्मरन्ध्रे। अः मुखे। कं दक्षबाहुमूले। खं कूर्परे। गं मणिबन्धे। घं अङ्गुलिमूले। ङं अङ्गुल्यग्रे। एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु। एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु। एवं तं ५ वामपादमूलसन्ध्यग्रकेषु। पं दक्षिणपार्श्वे। फं वामपार्श्वे। बं पृष्ठे। भं नाभौ। मं उदरे। यं हृदि। रं दक्षबाहुमूले। लं ककुदि। वं वामबाहुमूले। शं हृदादिदक्षहस्ते। षं हृदादिवामहस्ते। सं हृदादिदक्षपादे। हं हृदादिवामपादे। लं हृदाद्युदरे। क्षं हृदादिमुखे। सर्व्वत्र नमोऽन्तेन न्यसेत्। तथा च।
"ओमाद्यन्तो नमोऽन्तो वा सविन्दुर्विन्दुवर्ज्जितः।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः॥"
इति भट्टः॥

अथ संहारमातृकान्यासः।

तस्या ध्यानं यथा,—
"अक्षस्रजं हरिणपोतमुदग्रटङ्क-
विद्याः करैरविरतं दधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिमरुणामरविन्दरामां
वर्णेश्वरीं प्रणमतस्तनभारनम्राम्॥"
न्यासस्तु क्षकाराद्यकारान्तः। यथा। क्षं नमो हृदादिमुखे इत्यादि॥ * ॥
अपरञ्च।
"चतुर्धा मातृका प्रोक्ता केवला विन्दुसंयुता।
सविसर्गा सोभया च रहस्यं शृणु कथ्यते॥
विद्याकरी केवला च सोभया भुक्तिदायिनी।
पुत्रदा सविसर्गा तु सविन्दुर्वित्तदायिनी॥"
विशुद्धेश्वरे।
"वाग्भवाद्या च वाक्‌सिद्ध्यै रमाद्या श्रीप्रवृद्धये।
हृल्लेखाद्या सर्व्वसिद्ध्यै कामाद्या लोकवश्यदा॥
श्रीकण्ठाद्यानिमान् न्यस्येत् सर्व्वमन्त्रः प्रसीदति॥"
श्रीविद्याविषये नवरत्नेश्वरे।
"वाग्भवाद्या नमोऽन्ताश्च न्यस्तव्या मातृकाक्षराः।
श्रीविद्याविषये मन्त्री वाग्भवाद्यष्टसिद्धये॥"
यामले।
"भूतशुद्धिलिपिन्यासौ विना यस्तु प्रपूजयेत्।
विपरीतफलं दद्यादभक्त्या पूजनं यथा॥"
सामान्यन्यासे अङ्गुलिनियमो गौतमीये।
"मनसा विन्यसेन्न्यासान् पुष्पेणैवाथवा मुने।
अङ्गुष्ठानामिकाभ्यां वा चान्यथा विफलं भवेत्॥"
विशेषन्यासे तु नायं नियमः॥ * ॥

अथ पीठन्यासः।

ॐ आधारशक्त्यै नमः ॐ प्रकृत्यै नमः ॐ कूर्म्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै नमः ॐ क्षीरसमुद्राय नमः ॐ श्वेतद्वीपाय नमः एवं मणिमण्डपाय कल्पवृक्षाय मणिवेदिकायै रत्नसिंहासनाय एतत् सर्व्वन्तु हृदि। ततो दक्षिणस्कन्धे ॐ धर्म्माय नमः। वामस्कन्धे ॐ ज्ञानाय नमः। एवं वामोरौ वैराग्याय। दक्षिणोरौ ऐश्वर्य्याय। मुखे अधर्म्माय। वामपार्श्वे अज्ञानाय। नाभौ अवैराग्याय। दक्षिणपार्श्वे अनैश्वर्य्याय। सर्व्वत्र प्रणवादिनमोऽन्तेन न्यसेत्। तथा च शारदायाम्।
"अंसोरुयुग्मयोर्व्विद्वान् प्रादक्षिण्येन साधकः।
धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्य्यं क्रमशः सुधीः॥
मुखपार्श्वनाभिपार्श्वेष्वधर्म्मादीन् प्रकल्पयेत्॥"
पुनर्हृदि। ॐ अनन्ताय नमः। एवं पद्माय नमः। अं सूर्य्यमण्डलाय द्वादशकलात्मने नमः। उं सोममण्डलाय षोड़शकलात्मने नमः। मं वह्निमण्डलाय दशकलात्मने नमः। सं सत्त्वाय नमः। रं रजसे नमः। तं तमसे नमः। आं आत्मने नमः। अं अन्तरात्मने नमः। पं परमात्मने नमः। ह्रीं ज्ञानात्मने नमः। इत्यन्तं विन्यस्य हृत्पद्मस्य पूर्व्वादिकेशरेषु तत्तत्कल्पोक्तपीठशक्तीर्मध्ये पीठमनुञ्च न्यसेत्। यथा शारदायाम्।
"अनन्तं हृदये पद्मं तस्मिन् सूर्य्येन्दुपावकान्।
एषु स्वस्वकला न्यस्य नामाद्यक्षरपूर्व्वतः॥
सत्त्वादीन् त्रिगुणान् न्यस्य तथैवात्र गुरूत्तमः।
"आत्मानमन्तरात्मानं परमात्मानमेव च।
ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुं ततः॥"

अथ ऋष्यादिन्यासः।

ऋषिस्तु।
"महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम्।
संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः॥
गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्त्तितः।
सर्व्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते॥
अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम्।
सर्व्वेषामेव जन्तूनां भाषणात् प्रेरणात्तथा॥
हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत्।
ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रफलभाग्भवेत्॥
दौर्व्बल्यं याति मन्त्राणां विनियोगमजानताम्॥"
तन्त्रान्तरे।
"ऋषिं न्यसेन्मूर्द्ध्नि देशे छन्दस्तु मुखपङ्कजे।
देवतां हृदये चैव वीजन्तु गुह्यदेशके॥
शक्तिञ्च पादयोश्चैव सर्व्वाङ्गे कीलकं न्यसेत्॥"
अथाङ्गन्यासः। तत्राङ्गुलिनियमः।
त्रिद्व्येकदशकद्वित्रिसंख्यया शैलसम्भवे।
अङ्गुलीनामिति वचनादिति सर्व्वसाधारणम्॥
यामले।
"हृदयं मध्यमानामातर्ज्जनीभिः स्मृतं शिरः।
मध्यमातर्ज्जनीभ्यां स्यादङ्गुष्ठेन शिखा स्मृता॥
दशभिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरितम्।
प्रोक्ताङ्गुलीभ्यामस्त्रं स्यादङ्गक्लृप्तिरियं मता॥
तिसृभिस्तर्ज्जनीमध्यमानामाभिः॥
तर्ज्जनीमध्यमानामा प्रोक्ता नेत्रत्रये क्रमात्।
यदि नेत्रद्वयं प्रोक्तं तदा तर्ज्जनिमध्यमे॥"
इति भट्टधृतवचनात्॥
"हृदयादिषु विन्यस्येदङ्गमन्त्रांस्ततः सुधीः।
हृदयाय नमः पूर्व्वं शिरसे वह्निवल्लभा॥
शिखायै वषड़ित्युक्तं कवचाय हुमीरितम्।
नेत्रत्रयाय वौषट् स्यादस्त्राय फड़िति क्रमात्॥
षड़ङ्गमन्त्रानित्युक्तान् षड़ङ्गेषु नियोजयेत्।
पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत्॥"
इति शारदावचनम्॥
वैष्णवे तु।
"अनङ्गुष्ठा ऋजवो हस्तशाखा
भवेन्मुद्रा हृदये शीर्षके च।
अधोऽङ्गुष्ठा खलु मुष्टिः शिखायां
करद्वन्द्वाङ्गुलयो वर्म्मणि स्युः॥
नाराचमुष्ट्युद्धृतबाहुयुग्म-
काङ्गुष्ठतर्ज्जन्युदितो ध्वनिस्तु।
विश्वग्विशक्ता कथितास्त्रमुद्रा
यत्राक्षिणी तर्ज्जनिमध्यमे च॥"
शारदायाम्।
"न्यासक्रमेण देहेषु धर्म्मादीन् पूजयेत्ततः।
पुष्पाद्यैः पीठमन्वन्तं तस्मिंश्च परदेवताम्॥"
इति दर्शनात् शरीरे पीठपूजा।
"अङ्गहीनस्य मन्त्रस्य स्वेनैवाङ्गानि कल्पयेत्॥"
तथा ब्रह्मयामले।
"स्वनामाद्यक्षरं वीजं सर्व्वेषामभिधीयते॥"

अथ व्यापकन्यासः।

नवधा सप्तधा वापि मूलेन पञ्चधा त्रिधेति भैरवतन्त्रवचनात्। नवधाकरणे शिरस्तः पादान्तं पादतः शिरोऽन्तम्। एवं चतुर्धा। सप्तधाकरणे तादृशं त्रिधा। पञ्चधाकरणे तादृशं द्विधा। त्रिधाकरणेऽपि तादृशमेकधा। हृदादिमुखान्तन्तु शेषे एकधा सर्व्वत्रैव। शतधाकरणे तु तादृशं पञ्चाशद्वारं हृदादिमुखान्तं नास्तीति व्यापकन्यासः। इत्यागमतत्त्वविलासः॥ * ॥ नित्यं न्यासकरणफलं यथा,—
"आगमोक्तेन विधिना नित्यं न्यासं करोति यः।
देवताभावमाप्नोति मन्त्रसिद्धिः प्रजायते॥
यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये।
विघ्ना दृष्ट्वा पलायन्ते सिंहं दृष्ट्वा यथा गजाः॥"
न्यासाकरणे दोषो यथा,—
"अकृत्वा न्यासजालं यो मूढ़त्वात् प्रजपेन्मनुम्।
सर्व्वविघ्नैः स बाध्यः स्याद्व्याघ्रैर्मृगशिशुर्यथा॥"
इति तन्त्रसारः॥ * ॥
एते न्यासाः सामान्यपूजाप्रकरणोक्ताः। अन्ये च देवताविशेषे बहवः सन्ति बाहुल्यभिया तेषां प्रमाणादिकमलिखित्वा केवलं तत्र विष्णुविषये केशवकीर्त्त्यादि १ मूर्त्तिपञ्जर २ तत्त्व ३ भूतिपञ्जर ४ दशाङ्ग ५ पञ्चाङ्ग ६ न्यासाः। शिवविषये श्रीकण्ठादि १ ईशानादिपञ्चमूर्त्ति २ मन्त्र ३ मूर्त्ति ४ गोलक ५ शुभगादि ६ भूषण ७ न्यासाः। अन्नपूर्णाविषये